# Lesson 29: Bhagavad Gītā Pages 442 - 443

Sanskrit to English

33. श्रीभगवान् उवाच । अथ त्वम् इमं धर्म्यं संग्रामं न करिष्यसि चेत्, ततः स्वधर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि ।

34. भूतानि ते अव्ययाम् अकीर्तिं च अपि कथयिष्यन्ति । संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते ।

35. महारथाः त्वां भयात् रणात् उपरतं मंस्यन्ते । येषां च त्वं बहुमतः भूत्वा (तेषां) लाघवं यास्यसि ।

36. तव अहिताः च तव सामर्थ्यं निन्दन्तः बहून् अवाच्य-वादान् वदिष्यन्ति । ततः किं नु दुःखतरम् ।

37. हतः वा स्वर्गं प्राप्स्यसि, जित्वा वा महीं भोक्ष्यसे । तस्मात् युद्धाय कृत-निश्चयः उत्तिष्ठ कौन्तेय ।

38. सुख-दुःखे लाभ-अलाभौ जय-अजयौ समे कृत्वा, ततः युद्धाय युज्यस्व । एवं पापं न अवाप्स्यसि ।

39. एषा सांख्ये बुद्धिः ते अभिहिता, योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्म-बन्धं प्रहास्यसि पार्थ ।

40. इह अभिक्रम-नाशः न अस्ति, प्रत्यवायः न विद्यते । अस्य धर्मस्य स्वल्पम् अपि महतः भयात् त्रायते ।

41. कुरुनन्दन इह व्यवसाय-आत्मिका बुद्धिः एका । अव्यवसायिनां हि बुद्धयः बहु-शाखा अनन्ताः च ।

47. श्रीभगवान् उवाच । ते अधिकारः कर्मणि एव, मा कदाचन फलेषु । कर्म-फल-हेतुः मा भूः, अकर्मणि ते संगः मा अस्तु ।

48. धनंजय संगं त्यक्त्वा, योगस्थः सिद्धि-असिद्ध्योः समः भूत्वा कर्माणि कुरु । समत्वं योगः उच्यते ।

49. कर्म हि बुद्धि-योगात् दूरेण अवरं धनंजय । बुद्धौ शरणम् अन्विच्छ । फल-हेतवः कृपणाः ।

50. बुद्धि-युक्तः इह उभे सुकृत-दुष्कृते जहाति । तस्मात् योगाय युज्यस्व । योगः कर्मसु कौशलम् ।

51. बुद्धि-युक्ताः हि मनीषिनः कर्मजं फलं त्यक्त्वा, जन्म-बन्ध-विनिर्मुक्ताः अनामयं पदं गच्छन्ति ।

52. यदा ते बुद्धिः मोह-कलिलं व्यतितरिष्यति, तदा श्रोतव्यस्य श्रुतस्य च निर्वेदं गन्तासि ।

53. यदा ते श्रुति-विप्रतिपन्ना बुद्धिः निश्चला समाधौ अचला स्थास्यति, तदा योगम् अवाप्स्यसि ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva